चतुर्थः पाठः ४

# आदिकविः वाल्मीकिः

## ( सप्तमीविभक्तिः )

(संस्कृतसाहित्यस्य आदिकवेः महर्षिवाल्मीकेः जीवनगाथा तु अतीव विचित्रा एव अस्ति। एकचिन्तनमात्रेण एव घटनाविशेषेण वा तस्य जीवनं कथं परिवर्तितम् अभवत्। आगच्छन्तु वयं अनेन पाठमाध्यमेन अवगच्छामः।)



एकदा सघने वने सप्त ऋषयः गच्छन्ति स्म। तेषां कर्णपथे भयङ्करः ध्वनिः पतितः। "भोः ऋषयः! तिष्ठन्तु युष्माकं समीपे विद्यमानानि रुद्राक्षकमण्डलुवस्त्रादीनि भूतले अत्र स्थापयन्तु। एतेषु ममाधिकारः न युष्माकम्।" "भोः त्वं कः?" इति ऋषयः अपृच्छन्। "किं यूयं न जानीथ ? अहं रत्नाकरः नामधेयो ख्यातनामा दस्युः वनेऽस्मिन् मम भयकारणेन न कोऽपि प्रवेष्टुम् उत्सहते" इत्यवदत् रत्नाकरः। ऋषयः अवदन् "वत्स! केषां कृते स्वजीवने पापाचरणं करोषि?" रत्नाकरः अवदत् "अहं मम कुटुम्बपालनाय पोषणाय च इदं करोमि।" "भवान् येषां कृते इदमाचरति तान् पृच्छ। किम् तेऽपि अस्मिन् पापकर्मणि भागभूताः भविष्यन्ति?"

रत्नाकरः गृहं गत्वा पत्नीं पुत्रादीन् अपृच्छत्। "यः पापकर्म करिष्यति तस्य फलमपि स एव प्राप्स्यति, वयं न" इति कुटुम्बजनाः अवदन्। इदं श्रुत्वा रत्नाकरः स्तब्धः अभवत्। तस्य हृदये महापीडा जाता। आगत्य ऋषीणां चरणेषु अनमत्। ऋषिभिः प्रदत्तं रामनामजपम् आरभत् सः। तस्य शरीरे च पिपिलिकाभिः रचितेन वल्मीकेन वाल्मीकिः इति नाम्ना ख्यातो जातः कविः असौ।

एकदा तमसा नद्याः तीरे विद्यमानेन व्याधेन विध्यम् एकं काममोहितं क्रौञ्चखगम् अपश्यत्। तस्य सहचरस्य वियोगेन व्याकुलायाः क्रौञ्च्याः उच्चैः करुणं क्रन्दनम् अशृणोत्। तस्याः दयनीयां दशां विलोक्य द्रवितहृदयस्य ऋषेः मुखात् एकः श्लोकः निरगच्छत्।

**मा निषाद! प्रतिष्ठां त्वमगमः शाश्वतीः समाः।**
**यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्।।**

अयमेव श्लोकः लौकिकसंस्कृतसाहित्यस्य आदिश्लोकः, कविः च आदिकविः जातः। ब्रह्मणः आदेशेन एव सः कविः आदर्शपुरुषस्य रामस्य रामायणकथाम् अलिखत्। इयं कथा अतीव रमणीया अस्ति अतः उच्यते ''रम्या रामायणी कथा''

## शब्दार्थः

| शब्दः | सरलार्थः | हिन्दी अर्थ |
|---|---|---|
| कमण्डलुः | जलपात्रं | कमण्डल |
| नामधेयः | नामकः | नामवाला |
| पापकर्मणि | अशुभकार्ये | पाप कर्म में |
| कुटुम्बजनाः | परिवारजनाः | परिवार के लोग |
| व्याधः | आखेटकः | शिकारी |
| वल्मीकः | पिपीलिकाविवरः | बामी, बम्बोट |
| प्राप्नुहि | लभस्व | प्राप्त करो |
| अमारयः | मारितवान् | मार दिया। |
| ख्यातनामा | प्रसिद्धः | प्रसिद्ध |
| दस्युः | लुण्ठाकः | डाकू |
| रम्या | रमणीया | सुन्दर |

## अभ्यासः

१. **निम्नलिखितशब्दानाम् उच्चारणं कुरुत –**

युष्माकम्, कमण्डलुः, ममाधिकारः, ख्यातनामा, दस्युः,
प्रवेष्टुम्, पुत्रादीन्, व्याधेन, विध्यम्, त्वमगमः

२. **निम्नलिखितप्रश्नान् एकपदेन उत्तरत –**

(क) सप्त ऋषयः कुत्र गच्छन्ति स्म ?

(ख) रत्नाकरः कुत्र गत्वा कुटुम्बजनान् अपृच्छन् ?

(ग) स स्वमस्तकं कुत्र अनमत् ?

(घ) वाल्मीकिः तमसातीरे केन विध्यं खगम् अपश्यत् ?

(ङ) रामायणकथा कीदृशी अस्ति ?

### ३. रेखाङ्कितानि पदानि अधिकृत्य प्रश्ननिर्माणं कुरुत –

(क) इदं श्रुत्वा रत्नाकरः स्तब्धः अभवत्।

(ख) स आगत्य ऋषीणां चरणेषु समस्तकम् अनमत्।

(ग) ऋषेः मुखात् श्लोकः निरगच्छत्।

(घ) इयं कथा रमणीया अस्ति।

(ङ) महाकवेः ख्यातिः कुत्र प्रसृता अभवत्।

### ४. मञ्जूषातः पदानि चित्वा वाक्यानि पूरयत –

| रत्नाकरः, श्लोकः, कर्णपथे, सप्त, वाल्मीकिः |
|---|

(क) ऋषीणां ............................ भयङ्करः ध्वनिः पतितः।

(ख) वाल्मीकेः पूर्वनाम ................................. आसीत्।

(ग) ........................................ ऋषयः वने अगच्छन्।

(घ) वाल्मीकेः मुखात् ................................... निर्गतः।

(ङ) रामायणस्य रचनाकारः ............................... अस्ति।

### ५. अधोलिखितेषु पदेषु प्रयुक्तम् उपसर्गं लिखत –

| | | |
|---|---|---|
| **यथा**– | आगत्य | आ |
| (क) | वियोगेन | --------------- |
| (ख) | आरभत | --------------- |
| (ग) | विलोक्य | --------------- |
| (घ) | अनुवादः | --------------- |
| (ङ) | प्रतिकारः | --------------- |

**६. सुसङ्गतानि पदानि मेलयत -**

| | | |
|---|---|---|
| (क) | कालिदासः | योगसूत्रम् |
| (ख) | वेदव्यासः | अष्टाध्यायी |
| (ग) | माघः | अर्थशास्त्रम् |
| (घ) | पतञ्जलिः | रघुवंशम् |
| (ङ) | चाणक्यः | महाभारतम् |
| (च) | पाणिनिः | शिशुपालवधम् |

**७. ( क ) सप्तमीविभक्तेः रूपाणि लिखत -**

| | | | | | |
|---|---|---|---|---|---|
| **यथा** - | कोषः | कोषे | | नगरम् | नगरे |
| (क) | हस्तः | ------- | (ङ) | द्वारम् | ------- |
| (ख) | देवालयः | ------- | (च) | पुस्तकम् | ------- |
| (ग) | घटः | ------- | (छ) | अक्षरम् | ------- |
| (घ) | श्लोकः | ------- | (ज) | पत्रम् | ------- |

**( ख ) चित्रं दृष्ट्वा सप्तमीविभक्तेः रूपाणि जानीत रिक्तस्थानानि च पूरयत -**

| वस्त्राणि | कपाटिका | वस्त्राणि कपाटिकायाम् सन्ति |
|---|---|---|
|  |  |  |

| | | |
|---|---|---|
| **यथा**- | कपाटिका | कपाटिकायाम् |
| (क) | शाखा | -------- |
| (ख) | वाटिका | -------- |
| (ग) | माला | -------- |
| (घ) | पाकशाला | -------- |
| (ङ) | कक्षा | -------- |

(ग) चित्रं दृष्ट्वा सप्तमीविभक्तेः रूपाणि जानीत रिक्तस्थानानि च पूरयत –

| मकरः | नदी | मकरः नद्याम् अस्ति |
|---|---|---|
|  |  |  |

यथा– नदी नद्याम्

(क) कूपी --------

(ख) देवी --------

(ग) दूरवाणी --------

(घ) जननी --------

(ङ) सरस्वती --------

८. रेखाङ्कितपदे सप्तमीविभक्तिं प्रयुज्य वाक्यनिमार्णं कुरुत –

| | | | |
|---|---|---|---|
| यथा – | लेखनी | हस्तः | लेखनी हस्ते अस्ति। |
| (क) | दुग्धं | चषकः | -------- |
| (ख) | चिकित्सालयः | ग्रामः | -------- |
| (ग) | पक्षी | शाखा | -------- |
| (घ) | उत्तरम् | अभ्यासपुस्तिका | -------- |
| (ङ) | तैलम् | कूपी | -------- |
| (च) | पूनः पूरणी | लेखनी | -------- |

९. सप्तमीविभक्तेः द्विवचने बहुवचने च रूपाणि लिखत -

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
| --- | --- | --- | --- |
| यथा - | कूपे | कूपयोः | कूपेषु |
| (क) | सोपाने | ------ | ------ |
| (ख) | करवस्त्रे | ------ | ------ |
| (ग) | कारयाने | ------ | ------ |
| (घ) | मापिकायाम् | मापिकयोः | मापिकासु |
| (ङ) | मालायाम् | ------ | ------ |
| (च) | लेखन्याम् | ------ | ------ |

१०. रेखाङ्कितपदानां द्विवचने बहुवचने च प्रयोगं कृत्वा वाक्यानि रचयत -

यथा - दुग्धं चषके अस्ति। दुग्धं चषकयोः अस्ति। दुग्धं चषकेषु अस्ति।

(क) पुष्पाणि उद्याने सन्ति। ---- ---- ---- ---- ---- ----

(ख) मन्दिरं ग्रामे अस्ति। ---- ---- ---- ---- ---- ----

(ग) लताः वाटिकायां सन्ति। ---- ---- ---- ---- ---- ----

(घ) वानराः शाखायां सन्ति। ---- ---- ---- ---- ---- ----

(ङ) मकराः नद्यां सन्ति। ---- ---- ---- ---- ---- ----

११. उचितां विभक्तिं प्रयुज्य वाक्यानि पूरयत -

यथा - नौका जले विहरति। (जलम्)

(क) ब्रह्ममन्दिरं ........................................ अस्ति। (पुष्करम्)

(ख) छात्राः विद्यालयस्य ............................ क्रीडन्ति। (क्रीडाङ्गणम्)

(ग) खगाः ............................................ कूजन्ति। (शाखा)

(घ) माता ........................................ पाकं करोति। (पाकशाला)

## योग्यता-विस्तारः

१. **रामायणस्य परिचयः** – महर्षिः वाल्मीकिः एव आदिकाव्यं रामायणं रचितवान्। एतत् संस्कृतेन लिखितम् अस्ति। अत्र मर्यादापुरुषोत्तमस्य रामस्य कथा वर्णिता अस्ति। एतस्य कथा सप्तसु काण्डेषु विभक्ता अस्ति। तेषां नामानि सन्ति –

१. बालकाण्डम्
२. अयोध्याकाण्डम्
३. किष्किन्धाकाण्डम्
४. अरण्यकाण्डम्
५. सुन्दरकाण्डम्
६. युद्धकाण्डम्
७. उत्तरकाण्डम्।

अत्र चतुर्विंशतिसहस्रं (२४०००) पद्यानि सन्ति अतः एतत् "चतुर्विंशतिसाहस्री" अपि उच्यते। अस्य कथाम् आश्रित्य विभिन्नासु भाषासु अनेकग्रन्थाः रचिताः सन्ति। यथा –

| | |
|---|---|
| तमिलभाषायाम् | कम्बरामायणम् |
| अवधिभाषायाम् | रामचरितमानसम् |

२. **सर्वनाम शब्दानां सप्तमीविभक्तेः रूपाणि जानीम–**

| | | | | |
|---|---|---|---|---|
| पुँल्लिङ्गे नपुंसकलिङ्गे च | तत् | तस्मिन् | तयोः | तेषु |
| | एतत् | एतस्मिन् | एतयोः | एतेषु |
| | किम् | कस्मिन् | कयोः | केषु |
| स्त्रीलिङ्गे | तत् | तस्याम् | तयोः | तासु |
| | एतत् | एतस्याम् | एतयोः | एतासु |
| | किम् | कस्याम् | कयोः | कासु |
| त्रिषुलिङ्गेषु | अस्मद् | मयि | आवयोः | अस्मासु |
| | युष्मद् | त्वयि | युवयोः | युष्मासु |